# केवल अभ्यास हेतु नमूना प्रश्न पत्र
# Sample question paper for practice only
# हाई स्कूल परीक्षा वर्ष 2025
# High School Examination Year 2025
## विषय - संस्कृत
## Subject - Sanskrit

| Total Questions | Total printed Page | Time Hours | Maximum Marks |
|---|---|---|---|
| 23 | 08 | 03:00 | 75 |

**निर्देशाः -** 1. सर्वे प्रश्नाः अनिवार्याः सन्ति।

2. प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

3. सर्वेषां प्रश्नानां उत्तराणि संस्कृत भाषायां देयानि।

**01.** उचितं विकल्पं चित्वा लिखत - **1 x 6 = 6**

1. अस्मद् शब्दस्य षष्ठी विभक्तेः बहुवचनस्य रूपं अस्ति -

(अ) वयम् (ब) अस्माकम्

(स) अस्मासु (द) अस्मभ्यम्

2 . लतायाम् इत्यस्मिन् पदे का विभक्तिः अस्ति -

(अ) प्रथमा (ब) द्वितीया

(स) चतुर्थी (द) सप्तमी

3 . युष्मान् इति पदे वचनम् अस्ति -

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

4 . रामेण इति रूपम् अस्ति -

(अ) तृतीया, एकवचनस्य (ब) चतुर्थी, एकवचनस्य

(स) पंचमी, बहुवचनस्य (द) तृतीया, बहुवचनस्य

5. 'अहं श्वः विद्यालयं गमिष्यामि ' इत्यस्मिन् वाक्ये अव्ययम् अस्ति -

(अ) अहम् (ब) श्वः

(स) विद्यालयं (द) गमिष्यामि

6 . अधोलिखितेषु अव्ययम् अस्ति -

(अ) सर्वत्र (ब) पर्यावरणम्

(स) सौहार्दम् (द) फलानि

**02.** प्रदत्त शब्दैः रिक्तस्थानपूर्तिं कुरुत - **1x 6 = 6**

1. पश्यामः इत्यस्मिन् पदे **.... ....... ....** धातुः अस्ति। (पश्य/दृश्)
2. लभते इत्यस्मिन् पदे **.... ....... ....** पुरुषः अस्ति। (प्रथम/मध्यम)
3. पठ् धातोः विधिलिङ्ग लकारस्य उत्तमपुरुषस्य एकवचनस्य **........** रूपं अस्ति। (पठेः /पठेयम्)
4. अभवतम् इति रूपं **...... ..... ....** अस्ति। (द्विवचनस्य/बहुवचनस्य)
5. निर्धनः इत्यस्मिन् पदे **.... ..... ....** उपसर्गः अस्ति। (निस्/निर्)
6. प्रत्युपकारः इत्यस्मिन् पदे **.... ..... ....** उपसर्गः अस्ति। (प्रति/प्र)

**03.** शुद्ध वाक्यानां समक्षं "आम्" अशुद्ध वाक्यानां समक्षं "न" इति लिखत - **1x 6 = 6**

1. हि + अनन्ताः = ह्यनन्ताः भवति।
2. 'तवोत्तमा" इत्यस्मिन् पदे दीर्घ सन्धिः अस्ति।
3. "चौरोऽयम्" इत्यस्मिन् पदे विसर्ग सन्धिः अस्ति।
4. "विमूढधीः" इत्यस्मिन् पदे बहुव्रीहि समासः अस्ति।
5. "अयोग्यः" इति पदे अव्ययीभाव समासः अस्ति।
6. "त्रिभुवनम्" इति पदे द्विगु समासः अस्ति।

**04.** युग्ममेलनं कुरुत - **1x 6 = 6**

| **(अ)** | | **(ब)** |
|---|---|---|
| (i) कृतज्ञता | - | अश्वः |
| (ii) दूषितम् | - | नष्टाः |
| (iii) गच्छसि | - | कृतघ्नता |
| (iv) विशीर्णाः | - | यासि |
| (v) श्वेतः | - | कृषकः |
| (vi) निर्धनः | - | शुद्धम् |

**05.** एकवाक्येन उत्तरं लिखत - **1x 6 = 6**

1. "समागत्य" इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?
2. "कथयितुम्" इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?
3. "उपार्जितवान्" इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?
4. कीदृशाः प्राणिनः भूकम्पेन निहन्यन्ते ?
5. वयोऽनुरोधात् कः लालनीयः भवति ?
6. अनिशं महानगरमध्ये किं प्रचलति ?

## अधोलिखित प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत -

**06.** मीनः कदा दीनां गतिं प्राप्नोति ? **2**

अथवा

अस्माकं पर्यावरणे किं किं दूषितम् अस्ति ?

**07.** जम्बुकः किं वदन् व्याघ्रस्य उपहासं करोति ? **2**

अथवा

पृथिव्याः स्खलनात् किं जायते ?

08. वाचि का भवेत् ? **2**

**अथवा**

जनस्य क्रन्दनं निशम्य आरक्षी किमुक्तवान् ?

09. बालभावात् हिमकरः कुत्र विराजते ? **2**

**अथवा**

सुरभिः इन्द्रस्य प्रश्नस्य किमुत्तरं ददाति ?

10. सुधियः सख्यं केन सह भवति ? **2**

**अथवा**

यदि राजा सम्यक् न भवति तदा प्रजा कथं विप्लवेत ?

11. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - (केचित् द्वे) **2**

1. **<u>एतादृशी</u>** भयावहघटना गढ़वालक्षेत्रे घटिता।
2. पूरा त्वया **<u>मह्यं</u>** व्याघ्रत्रयं दत्तम्।
3. चातकः **<u>वने</u>** वसति।

12. अधोलिखितानि वाक्यानि कः कं प्रति कथयति - (कोऽपि द्वे) **2**

1. अनृतं वदसि चेत् काकः दशेत्। **कः - कं**
2. तस्या द्वे नाम्नी। **कः - कं**
3. पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। **कः - कं**

13. अधोलिखितानि वाक्यानि घटना क्रमानुसारेण लिखत - **2**

(i) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

(ii) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(iii) मार्गे सा एकं व्याघ्रं अपश्यत्।

(iv) प्रत्युत्पन्नमतिः सा शृगालम् आक्षिपन्ती उवाच ।

14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषितमेकं (एकं) लिखत। **2**

**15.** अधोलिखितेषु अशुद्ध-कारक वाक्यानां शुद्धिः करणीयाः - (कोऽपि द्वे) **2**

1. शिवं नमः।

2. विद्यालयः परितः वृक्षाः सन्ति।

3. वृक्षस्य पत्राणि पतन्ति।

**16.** रिक्तस्थानानि पूरयत - (केचित् चत्वारि) **2**

(i) चौरस्य ........................ प्रबुद्धः अतिथिः।

(ii) अश्वः चेत् .................... वीरः।

(iii) सर्वेषामेव महत्त्वं विद्यते .................. ।

(iv) यः .................. उद्दिश्य प्रकुप्यति।

(v) .................. समयस्य सदुपयोगः करणीयः।

(vi) ..............हरितिमा ............. शुचि पर्यावरणम्।

**17.** वाच्य परिवर्तनं कुरुत - (कोऽपि द्वे) **2**

1. छात्रः ग्रन्थं पठति। (कर्मवाच्ये )

2. काकः पिकस्य संततिं पालयति। (कर्मवाच्ये)

3. रामेण विद्यालयः गम्यते। (कर्तृवाच्ये)

**18.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - **3**

आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच - "रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।

1. कृशकायः कः आसीत् ?

2. उभौ शवं कुत्र स्थापितवन्तौ ?

3. भारवेदनया कः क्रन्दति स्म ?

**अथवा**

बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतोहि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अत्यधिका कृपा सहजैव " इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत् - "गच्छ वत्से ! सर्वं भद्रं जायेत्।" अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत।

1. चण्डवातेन मेघरवैश्च सह कः समजायत ?

2. मातुः अधिका कृपा कस्मिन् भवति ?

3. सुरभिवचनं श्रुत्वा भृशं कस्य हृदयमद्रवत् ?

**19.** अधोलिखितयोः पद्यांशयोः पठित्वा पद्यांशमेकस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत - **3**

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

1. विमूढधीः कीदृशीं वाचं परित्यजयति ?

2. पक्वं फलं कः परित्यजयति ?

3. विमूढधीः कीदृशं फलं भुङ्क्ते ?

**अथवा**

उदीरितोऽर्थः पशुनापि गृह्यते ,

हयाश्च नागाश्च वहन्ति बोधिताः।

अनुक्तमप्यूहति पण्डितो जनः ,

परेङ्गितज्ञानफला हि बुद्धयः।।

1. पशुना अपि कीदृशः अर्थः गृह्यते ?

2. बुद्धयः कीदृश्यः भवन्ति ?

3. पण्डितो जनः किं ऊहति ?

**20.** अधोलिखितयोः नाट्यांशयो: पठित्वा नाट्यांशमेकस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत- **3**

लवः - तस्याः द्वे नामनी।

विदूषकः - कथमिव ?

लवः - तपोवनवासिनो देवीति नामनाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः - अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।

विदूषकः - (उपसृत्य) आज्ञापयतु भवान्।

रामः - अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः ?

1. तपोवनवासिनः कुशस्य मातरं केन नाम्ना आह्वयन्ति ?
2. कस्याः द्वे नामनी ?
3. कुशलवयोः मातरं वाल्मीकिः केन नाम्ना आह्वयति ?

**अथवा**

सिंहः - (क्रोधेन गर्जन्) भोः ! अहं वनराजः किं भयं न जायते ? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा ?

एकः वानरः - यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि , तर्हि कथमस्मान् रक्षिष्यसि ?

अन्यः वानरः - किं न श्रुता त्वया पञ्चतन्त्रोक्तिः -

यो न रक्षति वित्रस्तान् पीड्यमाना परैः सदा।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ।।

काकः - आम् सत्यं कथितं त्वया - वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

पिकः - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपम् , न ध्वनिरस्ति।

1. कृतान्तः कः मन्यते ?
2. राजा कीदृशः भवति ?
3. कः वातावरणं कर्कश ध्वनिना आकुलीकरोति ?

**21.** अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत| (कोऽपिचत्वार:) **4**

हरियाणाराज्ये यमुनानगरमण्डले एकः संस्कृतपरिवारः अस्ति | तस्मिन् गृहे सर्वे संस्कृते सम्भाषणं कुर्वन्ति| तत्र पशवोऽपि संस्कृतम् अवबोद्धुं समर्थाः सन्ति | तस्मिन् गृहे अभिमन्युः नाम एकः युवकः अस्ति| सोऽपि संस्कृतम् वदति | एकदा तत्र एकः संस्कृत प्राध्यापकः आगतवान् | तेन सह अभिमन्युः संस्कृतेन सम्भाषणं कृतवान् | तस्य युवकस्य प्रतिभां दृष्ट्वा प्राध्यापकः अभिमन्यवे शतं रूप्यकाणि दत्तवान् | तस्मात् दिनात् तस्य मनसि संस्कृतं प्रति महती अभिरूचिः समुत्पन्ना | सः प्रतिदिनं गीतायाः श्लोकान् पठित्वा- पठित्वा सर्वान् श्लोकान् अस्मरत् |

1. संस्कृतपरिवारः कुत्र अस्ति ?
2. प्राध्यापकः कस्मै शतं रूप्यकाणि दत्तवान् ?
3. प्राध्यापकः अभिमन्यवे शतं रूप्यकाणि किमर्थं दत्तवान् ?
4. युवकः कथं गीतायाः श्लोकान् अस्मरत् ?
5. तत्र पशवो अपि किम् अवबोद्धुं समर्था: सन्ति ?

**22.** प्राचार्यस्यकृते त्रयदिवसानाम् अवकाशार्थम् एकं प्रार्थनापत्रं लिखत | **4**

**अथवा**

स्व-भगिन्या विवाहे आमन्त्रयितुं स्वमित्रम् प्रति पत्रं लिखत |

**23.** अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृत भाषायां निबन्धं लिखत - **4**

(अ) पर्यावरणम्

(ब) संस्कृतभाषायाः महत्त्वम्

(स) अस्माकं देशः

(द) महाकविः कालिदासः

---------------------------------------------------